तैलपूर्णे काष्ठादिनिर्मिते पात्रविशेषे । अत्रावस्थिति-गुणाः । वातरोगव्याधिकुष्ठरोगपङ्गुवाधिर्य्यमिन्मिनगद्गद-हन्वङ्गस्तम्भपृष्ठप्रचलितपवनगात्रकम्पकपाटीग्रीवाभङ्गाप-तन्त्रकक्षयरुधिरभवमूत्रकृच्छ्रवस्तिरोगेषु हितत्वमिति” राजवल्लभः ।

**तैलधान्य** न० तैलोपयोगि धान्यं सतुषं शस्यम् । “तिलोऽ-तसी च तोरी (डी) च विविधश्चापि सर्षपः । द्विधा राजी खसश्चैव वीजं कौसुम्भसम्भवम् । एतानि तैल-धान्यानीत्युक्तेषु तिलादिषु ।

**तैलपक** पु० तैलं पिबति पा—क स्वार्थे क । तैलपायिकाख्ये पक्षयुक्ते कीटे । तैलहरणे तज्जातिप्राप्तिर्मनुनोक्ता यथा “मांसं गृध्रोवपां मद्गुस्तैलं तैलपकः खगः” [भावप्र०।

**तैलपर्णक** पु० तैलाक्तमिव पर्णमस्य कप् । ग्रन्थिपर्णवृक्षे

**तैलपर्णिक** न० तैलपर्णी गिरिभेद उत्पत्तिस्थानत्वेना-स्त्यस्य ठन् तैलाक्तं पर्णमस्त्यस्य ठन् वा । १हरिचन्दने अमरः । तिलपर्णः इच्च उत्पत्तिस्थानत्वेनास्त्यस्य ठन् । २चन्दनभेदे ।

**तैलपर्णी** स्त्री तिलपर्णी गिरिस्तत्र भवः अण् ङीप् ।१चन्दने २श्रीवासे ३सिह्लके च मेदि० । स्वार्थे क । तैलपर्णिका तत्रार्थे । “कालियकादुकूलाख्य हिङ्गुवत्तैलपर्णिकाः” हरिवं० २३१अ० । [राजनि० ।

**तैलपा** स्त्री तैलं पिबति पा—क । (तेलापोका) कीटभेदे ।

**तैलपायिका** स्त्री पा—ण्वुल् इत० । (तेलापोका) (आर-सुला) कीटभेदे अमरः।

**तैलपायिन्** पु० तैलं पिबति पा—णिनि । तैलपायिकाख्ये पक्षयुक्ते कीटभेदे । “तैलहृत् तैलपायी स्यात्” याज्ञ०।

**तैलपिपीलिका** स्त्री तैलाक्तेव पिपीलिका । पिपिलीकाभेदे

**तैलपीत** त्रि० पीतं तैलं येन आहि०परनि०। पीततैलके ।

**तैलफल** पु० तैलं फले यस्य । इङ्गुदीवृक्षे राजनि० ।

**तैलभाविनी** स्त्री तैलं भावयति वासयति भू—णिनि ङीप् । तैलवासके जातीपुष्पवृक्षे राजनि०।

**तैलमाली** स्त्री तैलेन मालः सम्बन्धो यस्याः गौरा० ङीष् । वर्त्तिकायां दीपदशायां शब्दमाला ।

**तैलम्पाता** स्त्री तिलस्य पातोऽत्र अ नि०मुम् च । १स्वधा-याम्, २तद्युपलक्षिते श्राद्धे च अमरः ।

**तैलयन्त्र** पु० तैलमर्द्दनार्थं यन्त्रम् । तिलादिनिष्पीड़-नार्थे यन्त्रभेदे (कलुरघाणि) “असोमांशानि शौचानि तैलयन्त्रेक्षुयन्त्रयोः” स्मृतिः “रविरथचक्रं च तैलयन्त्र-चक्रवत् भ्रमत्” भागवते ५।२१।१८ श्लोकः ।

**तैलवक** पु० तैलुन्दपस्य विषयो देशः राजन्या० वुञ् । तैलु-न्दपविषये देशे । [रत्निघ०।

**तैलवल्ली** स्त्री तैलाक्तेव वल्ली । लघुशतावर्य्यां पारस्क-

**तैलसाधन** न० तैलं साधयति सुरभीकरोति सिध—णिच् साधि—ल्यु । कङ्कोले गन्धद्रव्ये शब्दच० । [मिदे हेमच०।

**तैलस्फटिक** पु० तैलाक्तः स्फटिक इव । लवणमणौ गो-

**तैलस्यन्दा** स्त्री तैलमिव स्यन्दति स्यन्द—अच् । १श्वेत-गोकर्ण्यां २काकोल्यां पारस्करनिघण्टुः ।

**तैलागुरु** पु० तैलाक्तमिवागुरु । दाहागुरौ राजनि० ।

**तैलाटी** स्त्री अटति अट तैलेनाटं विषमस्याः गौरा० ङीष् । वरटायां तैलस्पर्शे तद्विषनाशात् तस्याः तथात्वम् ।

**तैलाम्बुका** स्त्री तैलमम्बु इव पेयमस्याः । तैलपायि-काख्ये कीटे जटा०।

**तैलिक** त्रि० तैलं पण्यं यस्य तैलं शिल्पमस्य वा ठक् । २तैलार्थं तिलनिष्पीड़ने (कलु) “खलमलिननीच-तैलिकविहीनसत्त्वोपहृतपुंस्त्वा” इ०स०१६अ० । २तैल-विक्रेतरि च “समुद्रगामी वन्दी च तैलिकः कूट-कारकः” मनुः तिलविक्रेतुरपाङ्क्तेयतकम् ।

**तैलिन्** त्रि० तैलं निष्पाद्यत्वेनास्त्यस्य इनि । १तैलकारे हेमच०।२तैलयुक्ते त्रि०। स्त्रियां ङीप् ङीवन्तः। ३तैल-कीटे राजनि० ४दशायां वर्त्तौ शब्दमा० । [हेम० ।

**तैलिशाला** स्त्री इत० । तैलनिष्पीड़नार्थे गृहे (घाणिघर)

**तैलीन** तिलानां भवनं क्षेत्रं खञ् । तिलभवनयोग्ये क्षेत्रे अमरः । [इत्यस्मिन्निति स्त्रियां ङीप् ।

**तैव्रदारव** त्रि० तीव्रदारुण इदम् रजता० अञ् । तीव्रदा-

**तैष** पु० तिष्यनक्षत्रयुक्ता पौर्णमासी अस्मि यत्नोपे ङीप् । तैषी साऽस्मिन् मासे अण् ।१पौषे मासि धनुःस्थरव्यारब्धे शुक्लप्रतिपदादिदर्शान्ते चान्द्रे मासि अमरः तदीय पूर्णिमायामेव तद्योगसम्भवः । तिष्यशब्देन तत्समीप-नक्षत्रस्यापि ग्रहणात् कदाचित् तत्सम्बन्धाभावेऽपि न क्षतिः।२तदीयपौर्णमास्यां स्त्री “साऽस्मिन् पौर्णमासी” पा० नक्षत्रयुक्तकालस्य पूर्णिमायामेव तद्योगे साधुत्वेन पौर्णमासीपरत्वमेवेति बोध्यम् । “तैष्या नधीतपूर्वा-याम्” आश्व० श्रौ० ८।१४।२२ ।

**तोक** न० सौ० तु—क तस्य नेत्त्वम् । १अपत्ये पुत्रे, दु-हितरि च अमरः। “नित्वे तोके दीदिवांसम्” २।२।११ “प्रश्वे तोकाय तनयाय जीवसे” ऋ० १०।३५।१२ “तोकेन